दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णद्वितीया
बैशाख 20 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-190 | 1 | मई 03, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 HPBOSE 12th Result - हिमाचल-विद्यालयीय-शिक्षा-मण्डलं ४ मई दिनाङ्के द्वादश-कक्षायाः परिणामं घोषयिष्यति

3 केन्द्रीयसंस्कृतविश्वविद्यालयस्य वार्षिकोत्सवस्य छात्रावास-दिवसस्य च भव्यम् आयोजनम्

4 महर्षि-पाणिनि-संस्कृत-वैदिक-विश्वविद्यालयस्य ज्योतिर्विज्ञानविभागे प्राचीनकुण्डलीसङ्कलनाभियानस्य प्रारम्भः

## लोकसभाध्यक्षेण ओम बिरलावर्येण षड्विंशत्यधिक द्विसहस्र सप्तविंशत्यधिक द्विसहस्र वर्षयोः कृते चतुर्णां संसदीय-समितिनां पुनर्गठनं कृतम्।



लोकसभाध्यक्षेण ओम बिरलावर्येण षड्विंशत्यधिक द्विसहस्र सप्तविंशत्यधिक द्विसहस्र वर्षयोः कृते चतुर्णां संसदीयसमितिनां पुनर्गठनं कृतम्। लोकसभायाः भाजपा-सदस्यः डा. सञ्जय जायसवालः प्राक्कलनसमितेः अध्यक्षत्वेन नियुक्तः। सार्वजनिक-उपक्रम-समित्याः नेतृत्वं भाजपेति दलस्य सांसदः बैजयन्तपाण्डा करिष्यति। बिरला-वर्यः लोकसभायाः काङ्ग्रेस्-सदस्यं, के. सी. वेणुगोपालं लोकलेखा-समित्याः अध्यक्षत्वेन नियुक्तवान्, अनुसूचित जाति-अनुसूचित-जनजाति-कल्याण-समित्याः नेतृत्वं लोकसभायाः भाजपा-सदस्यः फग्गन सिङ्ग कुलस्ते-वर्येण भविष्यति।

## गुजरात-राज्यस्य सुरत-नगरे वाइब्रेंट गुजरात क्षेत्रीय-शिखर सम्मेलनम् सम्पन्नम्

गुजरात-राज्यस्य सुरत-नगरे वाइब्रेंट गुजरात क्षेत्रीय-शिखर सम्मेलनम् सम्पन्नम्, अस्मिन् तावत् त्रिपञ्चाशत्-सहस्राधिक-त्रिलक्ष-कोटिरूप्यतोऽप्यधिकानां द्विनवत्यधिक-सप्तशताधिक-द्विसहस्र सहमति-ज्ञापन-प्रपत्रेषु हस्ताक्षरम् अभवत्। अस्य शिखर सम्मेलनस्य समापन-सत्रम् सम्बोधयन् केन्द्रीय-मन्त्री जे.पी. नड्डा अवदत् यत् भारतेन वैश्विक आपूर्ति-शृङ्खलायाः बाधाः अवसरेषु परिवर्तयित्वा आत्मनिर्भर उत्पादन केन्द्ररूपेण समेधनीयम्। तेन सबलं प्रोक्तं यत् देशस्य उत्पादन क्षमतायाः संवर्धनम्, स्थायित्वस्य निर्माणं च देशस्य सर्वोच्च प्राथमिकता अस्ति। तेन अग्रे प्रोक्तम् यत् एतादृशाणि क्षेत्रीय-सम्मेलनानि विकसित-भारतस्य लक्ष्यं प्राप्तुं महतीं भूमिकां निर्वहन्ति। अत्रावसरे उपस्थितान् जनान् सम्बोधयन् गुजरात-राज्यस्य उपमुख्यमन्त्री हर्ष सङ्घवी अवदत् यत् अस्मिन् सम्मेलने हस्ताक्षरीकृतैः सन्धिभिः आगामी-त्रिषु वर्षेषु द्वि-दशमलव-यशीतिलक्ष-युवानः प्रत्यक्षोद्योगस्य अवसरान् प्राप्स्यन्ति ।

# पश्चिमबङ्गालस्य द्वयोः विधानसभा क्षेत्रयोः पञ्चदश-मतदानकेन्द्रेषु पुनर्मतदानं सम्पन्नम्



पश्चिमबङ्गाले दक्षिण 24 परगना जनपदस्य पञ्चदश-मतदानकेन्द्रेषु पुनर्मतदानं संपन्नम् । अस्मिन् मगराहाट-पश्चिम-क्षेत्रस्य एकादशक्षेत्राणि तथा डायमण्ड-हार्बर-क्षेत्रस्य चत्वारि मतदान केन्द्राणि सम्मिलितानि सन्ति। अन्तिम सूचनायाः प्राप्तिं यावत् द्विसप्तति दशमलव एकं चत्वारि प्रतिशतं मतदानं समङ्कितम्। उभयोः विधानसभा-क्षेत्रयोः मतदानं प्रायः शान्तिपूर्णं समभवत्। सम्बद्ध-निर्वाचन-अधिकारिणां तथा पर्यवेक्षकानां प्रतिवेदनानाम् आधारेण निर्वाचनायोगेन इदं पुनर्मतदानम् आदिष्टम् । विगत-मासस्य एकोनत्रिंशत् दिनाङ्के विधानसभा निर्वाचनस्य द्वितीय-चरणे अस्मिन् मतदान-केन्द्रे मतदानं सम्पन्नम्। पश्चिमबङ्गाल-केरल-तमिळनाडु-असमेषु तथैव पुदुच्चेरी-सङ्घराज्यक्षेत्रे जातानां विधानसभा निर्वाचनानाम् मतगणना सोमवासरे भविष्यति। असम-राज्यस्य षड्विंशत्यधिकैकशतम्, केरलस्य चत्वारिंशदधिकैकशतं, सहैव पुदुच्चेरी-राज्यस्य त्रिंशत् आसनानां कृते अप्रैल-मासस्य नव-दिनाङ्के मतदानम् अभवत्। तमिळनाडु-राज्यस्य चतुस्त्रिंशदधिक-द्विशतं विधानसभा क्षेत्राणां तथा पश्चिमबङ्गाल-राज्यस्य प्रथमचरणस्य द्विपञ्चाशदधिकैकशत- आसनानां कृते अप्रैल-मासस्य त्रयोविंशति-दिनाङ्के मतदानम् अभवत्।

### निर्वाचनायोगेन पश्चिमबङ्गलराज्ये सुरक्षायाः पञ्चषष्ट्यधिकैकशतं मतगणना-निरीक्षकाः सप्तसप्ततिः आरक्षक-निरीक्षकाश्च नियोजिताः।

निर्वाचनायोगेन पश्चिमबङ्गालराज्ये अतिरिक्त-गणना-पर्यवेक्षकाः आरक्षक-पर्यवेक्षकाश्च नियोजिताः। गणना-पर्यवेक्षकाणां साहाय्यं कर्तुं आहत्य पञ्चषष्ट्यधिकैकशतं यावत् अतिरिक्त-गणना-पर्यवेक्षकाः नियुक्ताः सन्ति, सप्तसप्ततिः आरक्षक-पर्यवेक्षकाः सुरक्षाव्यवस्थायाः सुदृढीकरणाय, गणनाकेन्द्राणां परितः विधि-व्यवस्था संस्थापनाय निरीक्षणाय च नियुक्ताः सन्ति।

## सुभाषितम्

**त्यजेत् क्षुधार्ताः जननी स्वपुत्रं,**
**खादेत् क्षुधार्ताः भुजगी स्वमण्डम्।**
**बुभुक्षितः किं न करोति पापं,**
**क्षीणा जनाः निष्करुणा भवन्ति।।**

भावार्थः- भूख से व्याकुल एक मां अपने पुत्र को भी त्याग देती है, एक भूखी सांपिन स्वयं अपने ही अंडों को खा जाती है। इसीलिए कहा गया है कि एक भूखा व्यक्ति कोई भी पाप कर सकता है। कमजोर व्यक्ति भी ऐसी परिस्थिति में निर्दय हो जाते हैं।




# छत्तीसगढ़-राज्ये कांकेर-नारायणपुर-जनपद-सीम्नि आई-ईडी विस्फोटने सुरक्षाबलस्य त्रयः कर्मचारिणः वीरगतिं अवाप्नुवन् एकश्च व्रणितो जातः



छत्तीसगढ़-राज्ये कांकेर-नारायणपुर-जनपद-सीम्नि आईईडी-विस्फोटने सुरक्षाबलस्य त्रयः कर्मचारिणः वीरगतिं अवाप्नुवन्, एकश्च व्रणितो जातः। इयं घटना तदा समभवत् यदा 'डिस्ट्रिक्ट रिज़र्व गार्ड' इत्यस्य कर्मचारिणः एकस्य विस्फोटक यन्त्रस्य निष्क्रिय करणे निरताः आसन्। आरक्षक-विभागात् प्राप्त-सूचनानुसारं छोटबेठिया-थाना क्षेत्रान्तर्गतं माइन-शोधनम्, क्षेत्र-प्रभुत्वम् तथा अन्वेषण-अभियानाय एकं डीआरजी-दलं नियुक्तम् आसीत्। अभियानकाले यदा आई-ईडी-उपकरणं निष्क्रियते स्म, तदा तस्य विस्फोटः अभवत् । विस्फोटने निरीक्षकः सुखराम वाट्टी तथा कृष्ण-कोमरा एवं संजय-गढ़पाले इत्येते गम्भीररूपेण व्रणिताः अभवन्, यैः अनन्तरं प्राणत्यागः कृतः। अन्यः व्रणितः आरक्षकः परमानन्द-कोमरा चिकित्सालये उपचाराधीनः वर्तते। बस्तर क्षेत्रस्य आरक्षक-महानिरीक्षकः सुन्दरराज-पी.इत्यनेन प्रोक्तं यत् आत्मसमर्पणं कृतवतां माओवादिनाम् तथा अन्य स्रोतसाम् आधारेण गत-मासेषु बस्तर-जनपदे बृहत्-सङ्ख्यायां आई-ईडी-उपकरणानि प्राप्तानि निष्क्रियं च कृतानि।

## सूचना-प्रसारण-मन्त्रालयः सम्प्रेषण-विशेषज्ञं प्रसून जोशी इत्यमुं भारतस्य सार्वजनिक सेवा-प्रसारकस्य प्रसार-भारती इत्यस्य अध्यक्षत्वेन नियुक्तवान्



सूचना-प्रसारण-मन्त्रालयः सम्प्रेषण-विशेषज्ञं प्रसून जोशी इत्यमुं भारतस्य सार्वजनिक सेवा-प्रसारकस्य प्रसार-भारती इत्यस्य अध्यक्षत्वेन नियुक्तवान्। श्री-जोशिनः कृतित्वे समादृतानि चलच्चित्र-गीतानि, विज्ञापन-अभियानानि, सामाजिक-अनुरणित-कथा-कथनानि च सन्ति, यानि सम्पूर्ण देशे विविधैः प्रेक्षकैः सह सम्बद्धानि सन्ति।

# HPBOSE 12th Result - हिमाचल-विद्यालयीय-शिक्षा-मण्डलं ४ मई दिनाङ्के द्वादश-कक्ष्यायाः परिणामं घोषयिष्यति

**हिमसंस्कृतवार्ताः - धर्मशाला।**

हिमाचलप्रदेश-विद्यालयीय-शिक्षा-मण्डलेन द्वादश-कक्ष्यायाः परीक्षापरिणाम-घोषणायाः तिथिः निर्णीता। शनिवासरे मण्डलेन अस्मिन् विषये सूचना दत्ता। अनेन सह परीक्षापरिणामं प्रति सहस्रशः विद्यार्थिनां प्रतीक्षा अपि समाप्ता अभवत्। विद्यालयीय-शिक्षा-मण्डल-धर्मशालायाः पक्षतः द्वादश-कक्ष्यायाः विज्ञान-वाणिज्य-कला-सङ्कायानां परिणामः ४ मई दिनाङ्के प्रातः एकादश (११:००) वादने घोषयिष्यते। शिक्षा-मण्डलस्य सचिवेन डॉ. मेजर विशाल-शर्मणा उक्तं यत् परीक्षापरिणामः सज्जः अस्ति। ४ मई दिनाङ्के एषः परिणामः मण्डलस्य जालपुटे (Website) अपि प्रसारितः भविष्यति।

## द्वादश-कक्ष्यायां ८१,४११ अभ्यर्थिनः पञ्जीकृताः आसन्

परीक्षापरिणाम-घोषणायाः सर्वाणि सज्जीकरणानि पूर्णानि सन्ति। उत्तरपुस्तिकानां मूल्याङ्कनकार्यं पूर्वमेव समाप्तम्, अधुना दत्तांश-सङ्कलनस्य (Data compilation) परिणाम-प्रक्रियायाः च अन्तिमः चरणः प्रचलति। अस्मिन् वर्षे द्वादश-कक्ष्यायाः परीक्षायां आहत्य ८१,४११ अभ्यर्थिनः पञ्जीकृताः आसन्, यदा तु दशम-कक्ष्यायां ९३,५६४ विद्यार्थिनः परीक्षाम् अयच्छन्। उभयोः कक्ष्ययोः परिणामं प्रति छात्रेषु अभिभावकेषु च महती उत्सुकता वर्तते। दशम-कक्ष्यायाः परीक्षाः ३ तः २८ मार्च पर्यन्तं, द्वादश-कक्ष्यायाः च ३ मार्च तः १ अप्रैल पर्यन्तं आयोजिताः आसन्।

## आधार-पत्रेण सह योजयिष्यते दशम-द्वादश-कक्ष्ययोः प्रमाण-पत्रम्

प्रदेश-शिक्षा-मण्डलः दशम-द्वादश-कक्ष्ययोः प्रमाण-पत्राणि आधार-पत्रेण (Aadhaar Card) सह योजयिष्यति। प्रमाण-पत्राणां आधारेण सह संयोजनात् परं 'डुप्लीकेट्' (प्रतिलिपि) प्रमाण-पत्रप्राप्तौ सुगमता भविष्यति, मिथ्या-प्रमाण-पत्राणां सम्भावना च न्यूनीभविष्यति। अस्य पदस्य मुख्योद्देश्यं प्रमाण-पत्राणां सुरक्षावर्धनं प्रक्रियायाः सरलीकरणं च अस्ति।



### विद्यार्थिनां मण्डल-कार्यालयं प्रति गमनं न भविष्यति

नूतन-व्यवस्थायाः अनन्तरं विद्यार्थिभ्यः स्वप्रमाण-पत्रार्थं वारं वारं मण्डल-कार्यालयं प्रति गन्तव्यं न भविष्यति। आधारेण सह सम्बद्धतायाः परं छात्राः गृहे स्थित्वा एव ऑनलाइन-माध्यमेन प्रमाण-पत्राणि 'डाउनलोड्' कर्तुं शक्ष्यन्ति। अनेन डिजिटल-पदक्षेपेण कूट-प्रमाण-पत्रेषु रोधः भविष्यति, प्रपत्राणां सत्यता च निश्चिता भविष्यति। प्रमाण-पत्रस्य विलोपने वा क्षति-स्थितौ छात्राः तत्कालं प्रतिलिपिं प्राप्तुं शक्ष्यन्ति।

### 'पीडीएफ' (PDF) 'हार्ड-कापी' (Hard copy) च द्वयोरपि रूपयोः लप्स्यते प्रमाण-पत्रम्

आधार-पत्रेण सह संयोजनात् परं छात्राः स्वप्रमाण-पत्रं 'पीडीएफ' तथा मुद्रित-रूपेण (Hard copy) प्राप्तुं शक्ष्यन्ति। एतदर्थं तेभ्यः आवेदन-काले एव विकल्पः दातव्यः भविष्यति। मुद्रित-प्रतिलिपिं प्राप्तुं पूर्ण-विवरणं दातव्यं भविष्यति, ततः परं शिक्षा-मण्डलः छात्रस्य सूचिते सङ्केते (Address) प्रमाण-पत्रं प्रेषयिष्यति। उभयोः विध्योः कृते पृथक्-पृथक् शुल्कं भविष्यति।

### ४१ केन्द्रेषु जातं मूल्याङ्कन-कार्यम्

शिक्षा-मण्डलेन अस्मिन् वारे मूल्याङ्कनार्थं प्रदेशे प्रायः ४१ केन्द्राणि स्थापितानि आसन्। तत्र दशम-द्वादश-कक्ष्ययोः उत्तरपुस्तिकानां मूल्याङ्कनं कृतम्। अस्मिन् कार्ये प्रायः ५,००० शिक्षकाणां नियुक्तयः कृताः आसन्।

# हिमाचल-नगरीय-निकाय-निर्वाचनम् : आहत्य १४२६ प्रत्याशिनः निर्वाचन-क्षेत्रे अवतीर्णाः

**हिमसंस्कृतवार्ताः - शिमला।**

हिमाचलप्रदेशे नगरीय-निकाय-निर्वाचनाय सम्पूर्णप्रदेशे ७२१ अभ्यर्थिनः शनिवासरे स्व-नामाङ्कनपत्राणि प्रस्तुतवन्तः। अनेन सह राज्ये नगरीय-निकाय-निर्वाचनाय नामाङ्कनप्रक्रिया अधुना पूर्णतया सम्पन्ना जाता। राज्ये दिनत्रयं यावत् प्रचलितायाम् अस्यां नामाङ्कनप्रक्रियायां इदानीं यावत् आहत्य १४२६ अभ्यर्थिनः स्व-नामाङ्कनपत्राणि प्रदाय निर्वाचन-युद्धे स्वशक्ति-प्रदर्शनस्य उत्साहं प्रकटितवन्तः। राज्य-निर्वाचन-आयोगेन ५१ नगरीय-निकायेषु निर्वाचनानि आयोज्यन्ते। राज्ये अधुना यावत् काङ्गड़ा-जनपदे सर्वाधिकं २६९ अभ्यर्थिनः नामाङ्कनपत्राणि दत्तवन्तः, यदा तु हमीरपुर-जनपदे न्यूनतमं नामाङ्कनानि जातानि।

हमीरपुर-जनपदे अधुना यावत् आहत्य ५५ अभ्यर्थिनः नामाङ्कनपत्राणि प्रस्तुतवन्तः। राज्ये २९ अप्रैल दिनाङ्के १५५ नामाङ्कनपत्राणि दत्तानि आसन्, ३० अप्रैल दिनाङ्के ५५०, तथा च २ मई दिनाङ्के ७२१ अभ्यर्थिनः स्व-नामाङ्कनपत्राणि प्रदत्तवन्तः। एवं प्रकारेण आहत्य १४२६ प्रत्याशिनः नगरीय-निकाय-निर्वाचने सक्रियताम् अदर्शयन्। आयोगानुसारं नामाङ्कनपत्राणां निरीक्षणं (Scrutiny) ४ मई दिनाङ्के प्रातः १० वादनतः सम्बद्ध-रिटर्निंग-अधिकारिभिः भविष्यति। ततः परं ६ मई दिनाङ्के नाम-निवृत्ति-प्रक्रियायां समाप्तायां सत्यां प्रत्याशिभ्यः निर्वाचन-चिह्नानि प्रदास्यन्ते। १७ मई दिनाङ्के प्रातः सप्तवादनतः अपराह्ने त्रिवादनपर्यन्तं मतदानं भविष्यति।

### विविध-जनपदेषु आवेदनानि

काङ्गड़ा - २६९
मण्डी - २१४
शिमला - १६७
सोलनम् - १५८
ऊना - १३७
कुल्लूः - १२५
चंबा - ११३
बिलासपुरम् - ९६
सिरमौरः - ९२
हमीरपुरम् - ५५

# सर्वोच्चन्यायालयेन पश्चिमबङ्गाल-निर्वाचने मतगणना-पर्यवेक्षकत्वेन केवलं केन्द्र-सर्वकारस्य कर्मचारिणां नियुक्तौ निर्वाचनायोगस्य निर्णये हस्तक्षेपं निराकृतम्



भारतस्य सर्वोच्चन्यायालयेन पश्चिमबङ्गाल-निर्वाचने मतगणना-पर्यवेक्षकत्वेन केवलं केन्द्र-सर्वकारस्य कर्मचारिणां नियुक्तौ निर्वाचनायोगस्य निर्णये हस्तक्षेपं निराकृतम् । न्यायमूर्तिना पी.एस. नरसिम्हा तथा न्यायमूर्तिना जॉयमाल्य बागची इत्यनयोः पीठेन निर्दिष्टं यत् आयोगस्य दिशा-निर्देशानां कठोरतया पालनं भवेत्। अयं निर्णयः 'तृणमूल-काङ्ग्रेस-दलस्य कृते एकः महत्तरः आघातः अस्ति, येन अस्य निर्णयस्य विरोधः कृतः आसीत्। न्यायालयस्य विचार-विमर्श-काले न्यायमूर्तिना बागची इत्यमुना प्रोक्तं यत् अधिकारिणां चयनस्य अधिकारः निर्वाचनायोगस्य पार्श्वे एव वर्तते। तेन एतत् अपि प्रोक्तं यत् प्रत्येकं मतगणना-पीठिकायां पूर्वमेव अभिकर्तारः, पर्यवेक्षकाः तथा निरीक्षकाः उपस्थिताः भवन्ति। एवं स्थितौ केन्द्र-कर्मचारिणां उपस्थित्याः विषये दर्शितानां चिन्तानाम् उपरि तेन प्रश्नचिह्नम् अपि उत्थापितम्।




# उत्तरप्रदेशे, सप्तविंशत्यधिक-द्विसहस्रतमवर्षस्य गृहसूच्यां केन्द्रितं जनगणनायाः प्रथमं चरणम् अस्मिन् मासे द्वाविंशतिः दिनाङ्के आरभ्यते

उत्तरप्रदेशे सप्तविंशत्यधिक-द्विसहस्रतमवर्षस्य गृहसूच्यां केन्द्रितं जनगणनायाः प्रथमं चरणम् अस्मिन् मासे द्वाविंशतिः दिनाङ्के आरभ्यते। मई-मासस्य सप्तम-दिनाङ्कात् स्वगणनायाः सौविध्यं प्राप्यते। लखनऊ-नगरे वार्ताहरसम्मेलने सेन्सस-आपरेशन्स् इत्यस्य राज्यनिर्देशिका तथा मुख्यप्राधान-सेन्सस-अधिकारिणा शीतलवर्मा इत्यनया प्रोक्तं यत्, नागरिकाः अस्य मासस्य सप्तमदिनाङ्कात् आधिकारिक-जालपटले पञ्जीकरणं कृत्वा स्व-गणना-सौकर्यस्य माध्यमेन भागं ग्रहीतुं शक्नुवन्ति। प्रक्रियां समाप्य ते एकं विशिष्टम् कूट-सङ्केतं प्राप्स्यन्ति, यच्च गृहगणनायाः समये प्रगणकेन सह अवश्यं विनिमयी करणीयम्। श्रीमती वर्मा अवदत् यत्, उत्तरप्रदेशे मई-मासस्य द्वाविंशतिदिनाङ्कात् जून-मासस्य विंशति-दिनाङ्कपर्यन्तं गृह-सूच्यां केन्द्रीकृतस्य सप्तविंशत्यधिक-द्विसहस्रतमवर्षस्य जनगणनायाः प्रथम-चरणस्य सञ्चालनं भविष्यति।

# रामपुर-खनेरी क्षेत्रस्य २०% परिमिताः नर्सिङ्ग-छात्राः क्षयरोगेण (TB) सङ्क्रमिताः, जयरामठाकुरेण सर्वकारः आक्षिप्तः



**हिमसंस्कृतवार्ताः - शिमला।** प्रतिपक्षनेता जयरामठाकुरः अवदत् यत् रामपुर-खनेरी स्थितस्य 'महात्मा गान्धी मेमोरियल नर्सिङ्ग संस्थानस्य' चिकित्सालयस्य च ९० छात्रासु १९ छात्राणां केनापि प्रकारेण क्षयरोगस्य (TB) सङ्क्रमणं भवितुम् अतीव दुर्भाग्यपूर्णा स्थितिः अस्ति। एकेनैव परिसरे एतावतीनां छात्राणां सङ्क्रमणं, ततः परं च सर्वकारेण किमपि प्रभावी पदक्षेपं न स्वीकरणं सर्वथा लज्जास्पदम् अस्ति। नर्सिङ्ग-शिक्षणं प्राप्नुवतीनां छात्राणां परिजनैः रामपुर-खनेरी संस्थानस्य चिकित्सा-अधीक्षकाय लिखितं पत्रं सर्वकारस्य विफलतां तथा च केन्द्रसर्वकारेण चाल्यमानानां क्षयरोग-उन्मूलनस्य युद्धस्तरीयाणां प्रयासानां विफलीकरणस्य गाथां कथयति। जयरामठाकुरः अवदत् यत् सम्पूर्णः देशः क्षयरोगस्य विरुद्धं निर्णायकं युद्धं कुर्वन् अस्ति। केन्द्रसर्वकारेण प्रतिस्तरं राज्यानां सहयोगः क्रियते। विश्वस्तरीयाणां कम्पनीनां औषधानि प्रत्येकं रोगिणं प्राप्तुं तथा सङ्क्रमणचक्रं रोद्धुं उपलब्धानि क्रियन्ते। राज्येभ्यः यथेष्टं धनं (Budget) दीयते। एतदतिरिच्य अपि चिकित्सा-संस्थाने नर्सिङ्ग-प्रशिक्षणं प्राप्नुवतीनां छात्राणां एतादृशं सङ्क्रमणं बुद्धेः परम् अस्ति। केन्द्रसर्वकारस्य पूर्णसहयोगानन्तरमपि राज्यसर्वकारस्य उदासीनं व्यवहारं निन्दनीयम्। एतादृश्याः गम्भीरायाः समस्यायाः विरुद्धं प्रवृत्तं युद्धस्तरीयं सङ्घर्षं सर्वकारेण एतादृश्या संवेदनहीनतया स्वीकरणं क्षयरोग-विरुद्ध-अभियानाय अपि सङ्कटपूर्णम् अस्ति। रामपुर-खनेरी छात्राणां परिजनैः लिखिते पत्रे एतत् स्पष्टं जातं यत् अनेकासु छात्रासु संकट-स्तरीयं एमडीआर-टीबी (MDR-TB) इति सङ्क्रमणम् अस्ति, यस्य उपचारः दीयते। एतेन ज्ञायते यत् यदा छात्रासु सङ्क्रमणं ज्ञातं, तदा तासां समुचितः उपचारः न कृतः।
प्रतिपक्षनेत्रा आश्चर्यं प्रकटितं यत् परिजनैः एषः आरोपः कृतः यत् नर्सिङ्ग-छात्राणां सङ्क्रमणानन्तरमपि ताभ्यः अभिचारः तन्त्र-मन्त्रं वा कारयितुं परामर्शः दीयते। एकतः मुख्यमन्त्री मञ्चेभ्यः विश्वस्तरीयाणां चिकित्सासुविधानां पक्षं करोति, अपरतः सर्वकारः क्षयरोगसदृशस्य गम्भीरस्य सङ्क्रामकस्य रोगस्य चिकित्सां कर्तुं स्थाने तन्त्र-मन्त्र (झाड़-फूंक') इति परामर्शं ददाति।
मुख्यमन्त्री प्रथमदिनात् एव असत्यं उक्त्वा स्वास्थ्य-व्यवस्थां सञ्चालयति। तस्य असत्यस्य शिथिलता-वृत्तेश्च परिणामाः अधुना प्रदेशे सम्मुखम् आगच्छन्ति। प्रतिपक्षनेत्रा उक्तं यत् परिजनैः चिकित्सा-अधीक्षकाय लिखिते पत्रे भोजनशालायाः (Mess) अनेकत्रुटयः अपि उल्लिखिताः। शुल्क-ग्रहणात् परम् अपि यदि सर्वकारः उच्चगुणवत्तायुक्तं पौष्टिकं भोजनं दातुं न शक्नोति, तर्हि एतत् सम्पूर्णतन्त्राय लज्जायाः विषयः। मुख्यमन्त्री एतासां सर्वासामपि उपालम्भानां उच्चस्तरीयान्वेषणं कारयित्वा कार्यविधिम् कुर्यात्, तथा च महाविद्यालये प्रसरन्तं सङ्क्रमणं रोद्धुं सङ्क्रमिताभ्यः छात्राभ्यः श्रेष्ठतमां चिकित्सा-सुविधां प्रदापयेत्।

# हिमाचलप्रदेशे पञ्चदिनानि यावत् वर्षा भविष्यति; अनेकजनपदेषु करकापातस्य 'आरेंज अलर्ट'




**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशे मौसमस्य स्थितौ महती विसंगतिः दृश्यते। राज्यस्य अनेकेषु भागेषु निरन्तरं पञ्चदिनानि यावत् वृष्टेः पूर्वानुमानं वर्तते। अस्मिन् काले पर्वतानां शिखरेषु हिमपातस्य अपि सम्भावना अस्ति। तत्रैव ४ मई दिनाङ्के अनेकेषु जनपदेषु करकापातस्य (ओलावृष्टि) 'आरेंज अलर्ट' इति घोषितम्। अद्य राजधानीशिमलायाम् उपनगरेषु च सूर्यप्रकाशेन सह मेघाः दृश्यन्ते। केषुचित् स्थानेषु मन्दवृष्टिः भवितुं शक्नोति।

## कृषकाणां फलविक्रेतृणां च चिन्ता वर्धिता

गुरुवासरे रात्रौ सिरमौरमण्डलस्य पच्छादक्षेत्रे प्रचण्डकरकापातेन गोधूम-यव-प्रभृति-सस्यानां फलोद्यानानां च महती क्षतिः अभवत्। क्षेत्रेऽस्मिन् अधुना गोधूमस्य यवस्य च सस्यानि पूर्णतया पक्वानि आसन्, किन्तु प्रकृत्याः कोपेन स्वर्णमयी सस्यसम्पत्तिः विनष्टा। नूतनतया आरोपिताः मरीचिकाः (शिमलामिर्च) रक्तफलानां (टमाटर) लतिकाः अपि नष्टाः। आलूक-खुमानी-प्लम इति फलवृक्षाणां महती हानिः जाता, येन कृषकाः अतीव चिन्तिताः सन्ति।

## कति दिनानि यावत् वृष्टिः भविष्यति?

शिमलास्थित-मौसमविज्ञानकेन्द्रानुसारं 'पश्चिमी विक्षोभ' इति प्रभावतः ३ मईतः ७ मई पर्यन्तं राज्ये वृष्टेः सम्भावना अस्ति। ४ मई दिनाङ्के ४०-५० कि. मी. प्रतिघण्टावेगेन प्रचण्डवायुः करकापातः च भवितुं शक्नोति। अतः कुल्लू, मण्डी, शिमला, सोलन, सिरमौरजनपदेषु विशेषसचेतना (आरेंज अलर्ट) जारीकृता। ३ तथा ५ मई दिनाङ्कयोः 'येलो अलर्ट' (पीत-सचेतना) अस्ति।

## तापमानस्य स्थितिः

शिमलायां न्यूनतमतपमानं १३.५, सुन्दरनगरे १६.३, भुन्तरे १३.२, कल्पायां ६.२, सोलननगरे १५.६ डिग्री सेल्सियस इति अभवत्। आगामिषु ३-४ दिनेषु तापमानं २-३ डिग्री पर्यन्तं न्यूनीभवितुं शक्नोति।

## मई मासे वातावरणस्य पूर्वानुमानम्

मौसमविभागानुसारं मई मासे हिमाचलस्य अधिकांशभागेषु सामान्यात् अधिका वृष्टिः भवितुं शक्नोति। निम्नपर्वतीयक्षेत्रेषु तापमानं सामान्यं भविष्यति, परन्तु उच्चशिखरेषु तापमानं सामान्यतः अधिकं भवितुं शक्नोति। मई मासे उष्णवातस्य (लू) प्रभावः अपि अधिककालपर्यन्तं स्थातुं शक्नोति।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य वार्षिकोत्सवस्य छात्रावास-दिवसस्य च भव्यम् आयोजनम्



केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे प्रतिवर्षमिव अस्मिन् वर्षेऽपि ०२.०५.२०२६ दिनाङ्के, ज्येष्ठकृष्णप्रतिपदायां, २०८३ वैक्रमाब्दे वार्षिकोत्सवस्य छात्रावासदिवसस्य च आयोजनं कृतम्। कस्यापि शैक्षणिकसंस्थानस्य वार्षिकोत्सवः संस्थानस्य उपलब्धीनां वार्षिकगतिविधीनां च पुनरवलोकनदृष्ट्या अतीव आनन्ददायकः भवति।
अस्मिन् कार्यक्रमे:

- **विशिष्टातिथिः-:** श्रीमान् आशुतोष कुमारः (न्यायाधिपतिः, राजस्थानोच्चन्यायालयः)
- **सारस्वतातिथिः-:** श्रीमान् लोकरञ्जनः (केन्द्रीयप्रशासनिकअधिकारी, राजस्थानम्)
- **अध्यक्षः-:** प्रो. लोकमान्यमिश्रः (निदेशकः, के.सं.वि. जयपुरपरिसरः)
- **विशिष्टोपस्थितिः-:** प्रो. शीशरामः (सह-निदेशकः, प्रशासनम्)

कार्यक्रमस्य आरम्भः वैदिकमङ्गलाचरणेन अभवत्, यत्र डॉ. सुश्री साधना पाण्डेय महोदया 'घनपाठं' प्रस्तुतवती। तदुपरान्तं धनञ्जयदेवराड़ी-महोदयस्य नेतृत्वे लौकिकमङ्गलाचरणं कृतम्। कार्यक्रमे सामूहिकरूपेण वन्दे मातरम् इति राष्ट्रगीतं तथा संस्थानस्य कुलगीतं च गानं कृतम्। भारतीयपरम्परानुसारं स्वागतगीतेन अतिथीनाम् अभिवादनम् अभवत्।
संयोजकः डॉ. सच्चिदानन्दस्नेही महोदयः मधुरवचनैः अतिथीनां स्वागतं कृतवान्। ततः परं सह-निदेशकः प्रो. शीशरामः परिसरस्य विस्तृतं 'वार्षिकप्रतिवेदनम्' प्रस्तुतवान्। अस्मिन् अवसरे मञ्चस्थैः अतिथिभिः जयपुरपरिसरस्य वार्षिकपत्रिकायाः 'जयन्ती' इत्यस्याः लोकार्पणं विहितम्। सारस्वतातिथिः श्रीमान् लोकरञ्जनः स्वकीये उद्बोधने उक्तवान् यत्— *"संस्कृतं देशस्य संस्कृतेश्च चिरन्तनधारा अस्ति। अस्माकं पुरातनी संस्कृतिः भाषा च संस्कृते एव अस्ति।" विशिष्टातिथिः न्यायाधिपतिः श्रीमान् आशुतोष कुमारः स्वविचारान् प्रकटयन् अवदत् यत्— "प्राचीनभारते संस्कृतं लोकभाषा आसीत्। अहं बहुभ्यः वर्षेभ्यः केवलं श्रवणकार्यं करोमि, किन्तु अद्य संस्कृतजगति वक्तुम् अवसरः प्राप्तः, एतत् मम सौभाग्यम् अस्ति।" तदनन्तरं सांस्कृतिककार्यक्रमाः आयोजिताः, येषु लोकसंस्कृतेः विभिन्नराज्यानां च झलक्यः प्रदर्शिताः। संस्कृतगीतैः धार्मिक-आध्यात्मिकवातावरणस्य निर्माणं कृतम्। योगविभागस्य छात्रैः विविधासनानां पिरामिडानां च साहसिकी प्रस्तुतिः कृता। अन्ते योग्याः छात्राः साहित्यिक-सांस्कृतिक-क्रीडाक्षेत्रेषु राष्ट्रियस्तरे च प्राप्तलब्धीनां कृते पुरस्कृताः। परिसरनिदेशकः आचार्यलोकमान्यमिश्रः स्वकीये अध्यक्षीयभाषणे छात्रेभ्यः शुभकामनाः प्रदत्तवान्, शिक्षणप्रक्रियायां तन्मयतायै अनुशासनपालनाय च आह्वानं कृतवान्। आचार्यश्रीधरमिश्रः सर्वेषां धन्यवादज्ञापनं कृतवान्। राष्ट्रगानेन सह कार्यक्रमस्य शोभापूर्णा समाप्तिः अभवत्।

# महर्षि-पाणिनि-संस्कृत-वैदिक-विश्वविद्यालयस्य ज्योतिर्विज्ञानविभागे प्राचीनकुण्डलीसङ्कलनाभियानस्य प्रारम्भः



**हिमसंस्कृतवार्ताः- डॉ. विजयकुमारः**
महर्षि-पाणिनि-संस्कृत-वैदिक-विश्वविद्यालयस्य ज्योतिर्विज्ञानविभागेन भृगुसंहितायाः रचयिता, ज्योतिषशास्त्रस्य च प्रवर्तकाचार्येषु मुख्यरूपेण महर्षिभृगोः जयन्त्याः अवसरे महर्षिभृगुमुपलक्ष्य “प्राचीनकुण्डलीसङ्कलनवर्ष 2026 अभियानम्” प्रारब्धम्।

अभियानस्य प्रारम्भसमये विश्वविद्यालयस्य माननीयः कुलगुरुः प्रो. शिवशङ्कर मिश्रः अवदत् यत् वर्तमानकाले संगणकनिर्मिताः कुण्डलयः प्रचलिताः सन्ति, यासु गणितेन सह फलादेशः अपि लिखितः दृश्यते, यद्यपि सः फलादेशः स्थूलः भवेत्। किन्तु प्राचीनकाले ज्योतिषिणः स्वयमेव गणितं कृत्वा कुण्डलीनिर्माणं कुर्वन्ति स्म। तत्र विविधवर्णैः ज्यामितीयाकारैः च विविधचक्राणि कलात्मकतया अलङ्कृतानि भवन्ति स्म। फलादेशाय प्रथमं प्रत्येकम् आयामं प्रति शास्त्रीयवचनानि उद्धृतानि भवन्ति स्म, अनन्तरं कुण्डल्याः अन्ते विस्तृतः फलादेशः अपि लिख्यते स्म। प्राचीनकुण्डलयः एकतः स्वकीयया कलात्मकतया लेखनपरम्परया च धरोहररूपेण सिद्धाः भवन्ति, अपरतः तासु लिखितः फलादेशः जातकस्य जीवनघटनाक्रमैः सह परीक्षितुं शक्यते।

किन्तु दुःखेन एतादृश्यः पूर्वजस्मृतयः प्रायः अवज्ञायन्ते, अनेकैः जनैः ताः परित्यज्य अपि विसर्ज्यन्ते। एतादृशानां धरोहररूपाणां कुण्डलीनां संरक्षणार्थं, ज्योतिषफलादेशस्य प्रमाणस्वरूपाणां च सन्दर्भाणां समाजे उद्घाटनार्थं विश्वविद्यालयस्य ज्योतिर्विज्ञानविभागेन एषः अभियानः प्रारभ्यते।

अस्याः अन्तर्गतं विभागः समाजस्य आवाहनं करोति यत् जनाः स्वसङ्ग्रहे स्थिताः प्राचीनकुण्डलयः विश्वविद्यालयाय समर्पयन्तु। यदि भवतः समीपे काचित् प्राचीनकुण्डली अस्ति, तर्हि तस्याः सम्बन्धिनः जातकस्य जीवनवृत्तविषये यथाशक्ति : विभागेन सह चर्चां कुर्युः। भवन्तः विभागीय-विद्युत्संकेते mpsvvjyotirvigyan@gmail.com इत्यस्मिन् सम्पर्कं कर्तुं शक्नुवन्ति।

कुलगुरुः अपि उक्तवान् यत् ज्योतिर्विज्ञानविभागस्य एषः उत्तमः अभियानः अस्ति, यः एकतः पूर्वजस्मृतिसंरक्षणं करिष्यति, अपरतः अनुसन्धानक्षेत्रे अपि महत्त्वपूर्णं योगदानं दास्यति।

अभियानस्य समन्वयनं विभागाध्यक्षः डॉ. शुभम् शर्मा तथा विभागीयाः प्राध्यापकाः करिष्यन्ति।

# १०८ व्याख्यानमालायाः सप्तदशतमं व्याख्यानं शङ्कराचार्यजयन्त्युत्सवपालनेन भव्यतया सुसम्पन्नम्






**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, नलबारी, असम।** विगतसप्ताहे नलबारीस्थस्य प्रतिष्ठितस्य कुमारभास्करवर्म-संस्कृत-पुरातनाध्ययन- विश्वविद्यालयस्य सर्वदर्शनविभागेन भगवतः आदिशङ्कराचार्यस्य जयन्तीं लक्षीकृत्य एकः भव्यः शैक्षणिक- सांस्कृतिक- कार्यक्रमः आयोजितः। सर्वदर्शनमन्थनपरिषदः तत्त्वावधाने प्रचालितायाः '१०८ व्याख्यानमालायाः' सप्तदशतमं (१८) सोपानम् एतेन उत्सवेन सहैव साफल्येन सम्पन्नमभवत्। अप्रैलमासस्य त्रयोविंशतिः तमे दिने विश्वविद्यालयस्य सभाङ्गणे आयोजितमिदं व्याख्यानं दर्शनशास्त्रस्य गाम्भीर्येण पूर्णमासीत्। अस्मिन् गरिमामये कार्यक्रमे मुख्यातिथिरूपेण विश्वविद्यालयस्य माननीय- कुलगुरवः आचार्याः प्रह्लाद रा. जोशीवर्याः उपस्थिताः आसन्। तैः स्वकीयेन उद्बोधनेन ज्ञानमार्गे शङ्कराचार्यस्य योगदानं विशेषतः अधोरेखितम्। मञ्चे सर्वदर्शनविभागाध्यक्षः आचार्यः रणजीतकुमार तिवारी, प्रथितविदुषी आचार्या उमा महेश्वरी बी, सहयिकाध्यापिका लोपामुद्रा गोस्वामी च उपस्थिताः आसन्। एतैः सहैव विभागीयाः अतिथि- अध्यापकाः, शोधच्छात्राः, जिज्ञासवः छात्राश्च कार्यक्रमस्य शोभां वर्धितवन्तः।कार्यक्रमस्य मुख्यव्याख्यात्री आचार्या उमा महेश्वरी बी महोदया आसीत्। तया अद्वैतवेदान्तस्य प्रासङ्गिकता इति विषये अतिगहनं प्रभावि च भाषणं दत्तम्। शङ्कराचार्यस्य अद्वैतसिद्धान्तः कथमद्यापि मानवकल्याणाय आवश्यकः इति सा सोदाहरणं निरूपितवती। ब्रह्म सत्यं जगन्मिथ्येति बोधयन् शङ्कराचार्यः न केवलं दार्शनिकः, अपि तु राष्ट्रस्य सांस्कृतिक-एकतायाः सूत्रधारः अपि आसीत्। अस्य समग्रस्य ज्ञानसत्रस्य अतिप्रभावि-सञ्चालनं अतिथि-अध्यापिकया मयूरी बरकाकति महोदयया कृतम्। तस्याः सञ्चालनचातुर्येण सम्पूर्णः कार्यक्रमः सूत्रबद्धः अभवत्। आचार्यः रणजीतकुमारतिवारीमहोदयः सर्वेभ्यः अतिथिसज्जेभ्यः, छात्रेभ्यः, प्रबन्धनसमित्यै च धन्यवादान् व्याहृतवान्। 'सर्वे भवन्तु सुखिनः' इति शान्तिमन्त्रोच्चारणेन सह एषः ज्ञानोत्सवः सम्पन्नताम् अगात्।

# विनोदकणिका

उच्यते यद्- पतिपत्न्याः सम्बन्धः सप्तजन्मानां कृते भवति। कथं ज्ञातुं शक्नुमः इदानीम् कः जन्म प्रचलति? तर्हि अत्यंत सरलम् अस्ति- यदा पत्नी उक्तवती- यद्- किं वदसि, अहं किमपि अवगन्तुं समर्थ नास्मि तदा प्रथमं, द्वितीयं वा जन्म आरभ्यते। यदि पत्नी वदति- अहं भवन्तं बहु सम्यक् जानामि तदा तव चतुर्थ, पञ्चमं जन्म प्रारभते। यदि पत्नी वदन्ती आसीत्- मम मुखं मा उद्घाटयतु। भवतः परिवारस्य सम्पूर्ण इतिहासं बहिः आनयिष्यामि। तर्हि भवतः सप्तमः, अन्तिमः च जन्म प्रचलन् अस्ति। त्वं सुखी भवसि। भवतः अभिनन्दनानि।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# विशिष्टम्




# आपदा-सूचना-प्रणाली (सेल ब्रॉडकास्ट सिस्टम)

सर्वकारेण स्वदेशी-तन्त्रांशस्य प्रयोगं कृत्वा नागरिकेभ्यः आपदायाः सद्यः सूचनां प्रदातुं 'सेल ब्रॉडकास्ट सिस्टम' इति आरब्धम्। अस्याः प्रणालीयाः परीक्षणार्थं अद्य मध्याह्ने प्रायः द्वादशवादने नागरिकाणां चलभाषेषु (मोबाईल) उच्चस्वरेण 'सायरन' नादेन सह एका सूचना प्रेषिता।

## परीक्षणसन्देशस्य विषयः

परीक्षणकाले सन्देशे लिखितम् आसीत् – "सतर्कः नागरिकः, सुरक्षितं राष्ट्रम्।" अयं सन्देशः केवलं परीक्षणार्थम् अस्ति, अतः जनतायै अत्र कोऽपि प्रतिभावः (रिएक्शन) दातुं आवश्यकता नास्ति।

## केन्द्रीयमन्त्रिणः वक्तव्यम्

केन्द्रीय-सञ्चारमन्त्री ज्योतिरादित्य सिन्धिया वर्यः सामाजिक-माध्यमेन अघोषयत् यत् अस्मात् सन्देशात् नागरिकैः भीतम् भवितुं किमपि प्रयोजनं नास्ति। एतत् भारतस्य नूतनायाः चलभाष-आधारित-आपदा-सञ्चार-प्रणाल्याः परीक्षणम् अस्ति। सः अवदत् यत् इयं प्रणाली 'दूरसञ्चार-विभागेन' 'राष्ट्रिय-आपदा-प्रबन्धन-प्राधिकरणस्य' सहयोगेन विकसिता अस्ति।

## भविष्यत्-योजना

श्री सिन्धिया उक्तवान् यत् भविष्ये अस्याः प्रणाल्याः माध्यमेन आपदायाः अथवा आपत्कालस्य स्थितिषु स्थानीयभाषासु स्थानविशेषानुसारं च सद्यः सूचनाः प्रेषयितुं शक्यन्ते। एषा पहल नागरिकाणां सुरक्षां दृढयितुं तथा आपदाकाले त्वरितसूचनाप्रदाने एकं महत्त्वपूर्णं पदम् अस्ति।

## दूरसञ्चार-विभागस्य दृष्टिकोणः

दूरसञ्चार-विभागेन उक्तं यत् एषा एका उन्नता सार्वजनिक-चेतावनी-प्रणाली अस्ति। अस्याः उद्देश्यं विषमपरिस्थितिषु समयनुसारं सञ्चारं सुनिश्चितं करणीयम् अस्ति। एषा पद्धतिः देशस्य आपत्कालीन-सञ्चार-व्यवस्थां सार्वजनिक-सुरक्षां च अधिकं शक्तिशालिनीं करोति।

# कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये बुद्धपूर्णिमायां भव्यः ज्ञानोत्सवः सम्पन्नः




**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, नलबारी, असम।** असमराज्यस्य नलबारीमण्डले स्थितस्य सुप्रतिष्ठितस्य 'कुमारभास्करवर्म-संस्कृत- पुरातनाध्ययन-विश्वविद्यालयस्य' परिसरः गतशुक्रवारे अपूर्वेण ज्ञानकोलाहलेन, आध्यात्मिक-गम्भीरतया, सांस्कृतिक-उल्लासेन मुखरितः अभवत्। विश्वविद्यालयस्य सर्वदर्शनविभागस्य सर्वदर्शनमंथनपरिषदः च संयुक्ततत्त्वावधानेन भगवतः बुद्धस्य पावनजयन्ती (बुद्धपूर्णिमा) अत्यन्तं भव्यतया, श्रद्धापूर्वकं च सम्पादितः। अस्मिन् महति महोत्सवे ज्ञानपरम्परायाः अभिवृद्धये प्रचालितायाः '१०८ व्याख्यानमालायाः' अष्टादशतमं सोपानम् अपि साफल्येन सम्पन्नमभवत्। शुक्रवासरे बुद्धपूर्णिमातिथौ निरन्तरं ज्ञानसाधनाय प्रवृत्तैः आयोजकैरयं कार्यक्रमः आभासीय-माध्यमेन आयोजितः। यथासमये आरब्धेऽस्मिन् सत्रे देशस्य विभिन्नभागेभ्यः विद्वांसः, प्राध्यापकाः, शोधच्छात्राः च एकस्मिन् मञ्चे समेताः।कार्यक्रमस्य आरम्भः मङ्गलाचरणेन अभवत्। सर्वदर्शनविभागस्य मेधाविनी छात्रा निशिता देवी स्वमधुरस्वरेण मन्त्रोच्चारणं कृत्वा वातावरणं पवित्रम् अकरोत्। अस्य समग्रस्य ज्ञानसत्रस्य अतिप्रभावि-सञ्चालनं विभागस्य प्रथितयशसा शोधच्छात्रेण लिराज काफ्ले इत्यनेन कृतम्। तस्य सञ्चालनचातुर्येण सम्पूर्णः कार्यक्रमः एकसूत्रेण निबद्धः आसीत्।अस्य व्याख्यानकार्यक्रमस्य मुख्यविषयः आसीत्- "आधुनिकयुगे भगवतः बुद्धस्य वचनानां प्रासङ्गिकता"। वर्तमानकालस्य यन्त्रयुगे, मानसिकव्यथायां, भौतिकवादे च बुद्धस्य उपदेशाः कथं मार्गदर्शकाः भवितुम् अर्हन्ति, तस्य विषये विस्तृतं विवेचनम् अभवत्। अस्मिन् गरिमामये कार्यक्रमे मुख्य-अतिथिरूपेण केन्द्रीय- संस्कृत-विश्वविद्यालयस्य एकलव्यपरिसरस्य कर्मठः निदेशकः आचार्यः गुरुचरण सिंह नेगी महोदयः समुपस्थितः आसीत्। तेन स्वकीयेन अनुभवपूर्णेन वक्तव्येन अतीव संक्षिप्ततया सम्यग्रूपेण बुद्धस्य शिक्षाणां सारः प्रकटितः। कार्यक्रमस्य मुख्यवक्ता केन्द्रीय- संस्कृत- विश्वविद्यालयस्यैव बौद्धदर्शनं तथा पालिशिक्षाशाखायाः सहायकाचार्यः डॉ. उत्तम सिंहः आसीत्। तेन अतीव सरलभाषया, शास्त्रीयदृष्ट्या च भगवता बुद्धेन प्रतिपादितानि चत्वारि आर्यसत्यानि, द्वादशनिदानानि, अष्टाङ्गिकमार्गाः चेति विषयेभ्यः प्रकाशः पातितः। तेन स्पष्टीकृतं यत् भौतिकतायाः शमनाय, आन्तरिकशान्तये च बौद्धदर्शनस्य उपादेयता अद्यापि सर्वथा प्रासङ्गिका अस्ति। कार्यक्रमस्य अध्यक्षतां कुर्वन्तः विश्वविद्यालयस्य माननीय- कुलगुरवः आचार्याः प्रह्लाद रा. जोशीवर्याः उपस्थिताः आसन्। तैः स्वकीयोद्बोधनेन ज्ञानमार्गे भगवतः बुद्धस्य योगदानं विशेषतः अधोरेखितम्। कुलगुरुमहोदयेन उक्तं यत्- "भारतीय-दर्शनस्य धारायां बुद्धस्य करुणा, शिक्षा चैव मानवजीवनं पूर्णं करोति।" अस्मिन् कार्यक्रमे विश्वविद्यालयस्य प्रशासनिकपक्षस्य, शैक्षणिक- पक्षस्य च महती उपस्थितिः दृश्यते स्म। प्रमुखतया उपस्थिताः आसन्- आचार्यः मनोजकुमार शर्मा (कुलसचिवः), आचार्या मल्लिका कलिता (समकुलपतिः), डॉ. प्रशान्त ज्योति गौतमः (परीक्षानियन्त्रकः), आचार्यः रणजीतकुमार तिवारी (सर्वदर्शनविभागाध्यक्षः), आचार्या उमा महेश्वरी बी (आचार्या, सर्व दर्शनविभागः) लोपामुद्रा गोस्वामी (सहायकाध्यापिका, सर्वदर्शनविभागः) एतैः सहैव विश्वविद्यालयस्य नैकाः विभागाध्यक्षाः, संकायाध्यक्षाः, सहायकाचार्याः, विभागीयाः अतिथि- अध्यापकाः, शोधच्छात्राः, जिज्ञासवः छात्राश्च उपस्थिताः आसन्। सर्वदर्शनविभागाध्यक्षः आचार्यः रणजीतकुमारतिवारीमहोदयः सर्वेभ्यः अतिथिसज्जेभ्यः, छात्रेभ्यः, प्रबन्धनसमित्यै च धन्यवादं ज्ञापितवान्। तेन कार्यक्रमे सहयोगदानाय सर्वान् प्रति कृतज्ञता प्रकटीकृता। अन्ते "सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः" इति शान्तिमन्त्रोच्चारणेन सह एषः भव्यः ज्ञानोत्सवः शान्त्या आनन्देन च सम्पन्नताम् अगात्। केन्द्रीयसंस्कृत-विश्वविद्यालयस्य जयपुरपरिसरेण आयोजितस्य वार्षिकोत्सवस्य छात्रावासदिवसस्य च संस्कृतभाषायाम् अनुवादः अधोनिर्दिष्टः अस्तिः

# स्वामी-विवेकानन्द-कनिष्ठ-महाविद्यालयस्य द्वादश-श्रेणी-परिणामे दैदिप्यमानं यशः तथा गुणवतां विद्यार्थिनां गौरवपूर्णः सत्कारः



**जलगांव-नगरात् (प्रतिनिधिः : अर्जुन-शास्त्री) हिमसंस्कृतवार्ता** के.सी.ई. सोसायटी-सञ्चालिते स्वामी-विवेकानन्द-कनिष्ठ-महाविद्यालये (मूलजी-जेठा-महाविद्यालये), जलगांव-नगरे, फेब्रुवारी-मार्च २०२६ मासयोः आयोजितायां उच्च-माध्यमिक-प्रमाणपत्र-परीक्षायां (द्वादश-श्रेणी) छात्रैः उल्लेखनीयम् उत्कृष्टं च यशः संपादितम्। अस्य महाविद्यालयस्य कुल-परिणामः ९४.२४% इति अभवत्, येन संस्थायाः गौरवमयी परम्परा पुनः उज्ज्वलिता। वाणिज्य-शाखायां अंशिका अमित बियाणी (९६.५०%) प्रथमं स्थानं प्राप्तवती, कला-शाखायां देवयानी दीपक पध्यार (९४.१७%) प्रथमं स्थानं अलभत, विज्ञान-शाखायां होमेश कमलाकर पाटील (९०.६७%) प्रथमः अभवत्, तथा एम.सी.व्ही.सी. शाखायां अनुजकुमार यशवंत मिश्रा (६०.६३%) प्रथमं स्थानं प्राप्तवान्।

🌟 संस्कृत-विषये अद्वितीयं यशः
अस्मिन् वर्षे संस्कृत-विषये विशेषतया अभूतपूर्वं यशः प्राप्तम्। महाविद्यालयस्य २० छात्राः १००/१०० अङ्कान् प्राप्तवन्तः। तेषां नामानि—गार्गी भगवत, देवदत्त जोशी, शैलेश खंगार, हेरंब वाघुळदे, ईशा पापरीकर, निकिता इंगळे, कुलश्री फक्कड, तन्मयी पाटील, पल्लवी सोनवणे, प्रणाली नारखेडे, रोहित ब्राम्हणकर, नकुल पाटील, जयंती पाटील, रिया जैन, नंदिनी आवचार, नंदिनी शर्मा, यामिनी मोरे, मैत्रेयी जाडे, मानसी सैनी, सुरभी भक्कड इति।

📚 **विषयानुसारं शत-प्रतिशताङ्क-प्राप्ताः छात्राः**
**अन्येषु विषयेषु अपि छात्रैः अत्युत्तमं प्रदर्शनं कृतम्—**
वाणिज्य-गणित (Math – Commerce) : रिया नरेश जैन, वरद संजय बोंडे, हृदय विशाल पिपरिया, आशू रामकिशन वर्मा, जीनल धरम सांखला, साक्षी महेश अगिवाल, दिशा राजेश चोरडिया, संस्कृती दिनेश येवले, सुरभी रुपेश भक्कड
लेखाशास्त्र (Accountancy – Commerce) : दिया विमल जैन, ओम निलेश चौरासिया, आशू रामकिशन वर्मा, निमित निलेश नथानी, दिशा राजेश चोरडिया, हर्ष सुनील राजपूत
अर्थशास्त्र (Economics – Commerce) : साक्षी महेश अगिवाल, पूर्णा ललित लोकचंदानी
गणित (Science) : प्राची अनिल भांडारकर
संगीत (Arts – Music) : समीक्षा लक्ष्मीकांत माकोडे
समग्रतया ३९ छात्राः विभिन्नेषु विषयेषु शत-प्रतिशताङ्कान् प्राप्तवन्तः, यत् महाविद्यालयस्य शैक्षणिक-उत्कृष्टतायाः प्रमाणम् अस्ति।

## शाखानुसारं गुणवतां छात्राणाम् विवरणम्

**वाणिज्य-शाखा :**
द्वितीय-स्थानम् – दिया जैन, यशश्री महाजन, संस्कृती येवले (९६%)
तृतीय-स्थानम् – जीनल सांखला, सुरभी भक्कड (९५.८३%)

**कला-शाखा :**
द्वितीय-स्थानम् – श्रेया कुमारी (९०.५०%)
तृतीय-स्थानम् – जयंती पाटील (८५.५०%)

विज्ञान-शाखा :
द्वितीय-स्थानम् – प्राची भांडारकर (८८%)
तृतीय-स्थानम् – भूमिका महाजन (८७.६७%)

**एम.सी.व्ही.सी. :**
द्वितीय-स्थानम् – हर्षल वाणी (५८.६७%)
तृतीय-स्थानम् – कपिल लोढे (५८.३३%)

## 🎉 सत्कार-समारोहः उत्साहपूर्णः

अस्य उज्ज्वल-यशसः निमित्तम् महाविद्यालये भव्यः सत्कार-समारोहः आयोजितः। कार्यक्रमस्य आरम्भः स्वामी-विवेकानन्दस्य प्रतिमायाः पूजनं पुष्पार्पणं च कृत्वा कृतः। ततोऽनन्तरं गुणवतां छात्राणां प्रमाणपत्रैः, पारितोषिकैः तथा वार्षिक-नियतकालिक-प्रदानेन सन्मानः विधिवत् कृतः।
अस्मिन् प्रसङ्गे के.सी.ई. सोसायटी-अध्यक्षः प्रज्ञावंत नंदकुमार बेंडाळे, प्रशासकीय-अधिकारी शशिकांत वडोदकर, प्राचार्यः डॉ. एस. एन. भारंबे, उपप्राचार्यः आर. बी. ठाकरे, पर्यवेक्षकः एस. ए. ब-हाटे, समन्वयकौ प्रा. उमेश पाटील तथा प्रा. गुणवंत वंजारी इत्यादयः मान्यवराः उपस्थिताः आसन्। तैः छात्राणां परिश्रमस्य प्रशंसा कृत्वा तेषां उज्ज्वल-भविष्याय हार्दिकाः शुभाशयाः प्रदत्ताः।
अन्ते, आचार्याणां मार्गदर्शनम्, पालकानां सहकार्यं तथा छात्राणां अखण्ड-परिश्रमः—एतेषां संयुक्त-प्रयत्नेन एतत् दैदिप्यमानं यशः साधितम् इति सर्वैः स्वीकृतम्। एतेन महाविद्यालयस्य कीर्तिः अधिका वर्धिता, तथा परिसरस्य शैक्षणिक-प्रतिष्ठा दृढतरा जाता इति सर्वत्र हर्षोल्लासः दृश्यते।